श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## UG-11.28- षष्ठः सोपान



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।
देवीं(म्) सरस्वतीं(वँ) व्यासं(न्), ततो जयमुदीरयेत्॥

नामसङ्कीर्तनं(यँ) यस्य, सर्वपापप्रणाशनम्।
प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्॥

**श्रीमद्भागवतमहापुराणम्**

**एकादशः स्कन्धः**

**॥ अथाष्टाविं(म्)शोऽध्यायः ॥ 28 ॥**

**श्रीभगवानुवाच**

परस्वभावकर्माणि, न प्रशं(म्)सेन्न गर्हयेत् ।
विश्वमेकात्मकं(म्) पश्यन्, प्रकृत्या पुरुषेण च ॥ 1॥

परस्वभावकर्माणि, यः(फ्) प्रशं(म्)सति निन्दति ।
स आशु भ्रश्यते स्वार्था- दसत्यभिनिवेशतः ॥ 2॥

तैजसे निद्रयाऽऽपन्ने, पिण्डस्थो नष्टचेतनः ।
मायां(म्) प्राप्नोति मृत्युं(वँ) वा, तद्वन्नानार्थदृक् पुमान् ॥ 3॥

किं(म्) भद्रं(ङ्) किमभद्रं(वँ) वा, द्वैतस्यावस्तुनः(ख्) कियत् ।
वाचोदितं(न्) तदनृतं(म्), मनसा ध्यातमेव च ॥ 4॥

छायाप्रत्याह्वयाभासा, ह्यसन्तोऽप्यर्थकारिणः ।
एवं(न्) देहादयो भावा, यच्छन्त्यामृत्युतो भयम् ॥ 5॥

आत्मैव तदिदं(वँ) विश्वं(म्), सृज्यते सृजति प्रभुः ।
त्रायते त्राति विश्वात्मा, ह्रियते हरतीश्वरः ॥ 6॥

तस्मान्न ह्यात्मनोऽन्यस्मा- दन्यो भावो निरूपितः ।
निरूपितेयं(न्) त्रिविधा, निर्मूला भातिरात्मनि ।
इदं(ङ्) गुणमयं(वँ) विद्धि, त्रिविधं(म्) मायया कृतम् ॥ 7॥

एतद् विद्वान् मदुदितं(ञ्), ज्ञानविज्ञाननैपुणम् ।
न निन्दति न च स्तौति, लोके चरति सूर्यवत् ॥ 8॥

प्रत्यक्षेणानुमानेन, निगमेनात्मसं(वँ)विदा ।
आद्यन्तवदसज्ज्ञात्वा, निः(स्)सं(ङ्)गो विचरेदिह ॥ 9॥

उद्धव उवाच
नैवात्मनो न देहस्य, सं(म्)सृतिर्द्रष्टृदृश्ययोः।
अनात्मस्वदृशोरीश, कस्य स्यादुपलभ्यते ॥ 10॥

आत्माव्ययोऽगुणः(श्) शुद्धः(स्), स्वयं(ञ्)ज्योतिरनावृतः ।
अग्निवद्दारुवदचिद्- देहः(ख्) कस्येह सं(म्)सृतिः ॥ 11॥

**श्रीभगवानुवाच**

**यावद् देहेन्द्रियप्राणै- रात्मनः सन्निकर्षणम् ।**

**सं(म्)सारः(फ्) फलवां(म्)स्ताव- दपार्थोऽप्यविवेकिनः ॥ 12॥**

**अर्थे ह्यविद्यमानेऽपि, सं(म्)सृतिर्न निवर्तते ।**

**ध्यायतो विषयानस्य, स्वप्नेऽनर्थागमो यथा ॥ 13॥**

**यथा ह्यप्रतिबुद्धस्य, प्रस्वापो बह्वनर्थभृत् ।**

**स एव प्रतिबुद्धस्य, न वै मोहाय कल्पते ॥ 14॥**

**शोकहर्षभयक्रोध- लोभमोहस्पृहादयः।**

**अहं(ङ्)कारस्य  दृश्यन्ते, जन्म मृत्युश्च नात्मनः ॥ 15॥**

**देहेन्द्रियप्राणमनोऽभिमानो,**

**जीवोऽन्तरात्मा गुणकर्ममूर्तिः ।**

**सूत्रं(म्) महानित्युरुधेव गीतः(स्),**

**सं(म्)सार आधावति कालतन्त्रः ॥ 16॥**

**अमूलमेतद् बहुरूपरूपितं(म्),**

**मनोवचः(फ्)प्राणशरीरकर्म ।**

**ज्ञानासिनोपासनया शितेनच्-**

**छित्त्वा मुनिर्गां(वँ) विचरत्यतृष्णः ॥ 17॥**

ज्ञानं(वँ) विवेको निगमस्तपश्च,
प्रत्यक्षमैतिह्यमथानुमानम् ।
आद्यन्तयोरस्य यदेव केवलं(ङ्),
कालश्च हेतुश्च तदेव मध्ये ॥ 18॥

यथा हिरण्यं(म्) स्वकृतं(म्) पुरस्तात्,
पश्चाच्च सर्वस्य हिरण्मयस्य ।
तदेव मध्ये व्यवहार्यमाणं(न्),
नानापदेशैरहमस्य तद्वत् ॥ 19॥

विज्ञानमेतत्त्रियवस्थमं(ङ्)ग,
गुणत्रयं(ङ्) कारणकार्यकर्तृ ।
समन्वयेन व्यतिरेकतश्च,
येनैव तुर्येण तदेव सत्यम् ॥ 20॥

न यत् पुरस्तादुत यन्न पश्चान्-
मध्ये च तन्न व्यपदेशमात्रम् ।
भूतं(म्) प्रसिद्धं(ञ्) च परेण यद् यत्,
तदेव तत् स्यादिति  मे मनीषा ॥ 21॥

अविद्यमानोऽप्यवभासते यो,
वैकारिको राजससर्ग एषः ।
ब्रह्म स्वयं(ञ्)ज्योतिरतो विभाति,
ब्रह्मेन्द्रियार्थात्मविकारचित्रम् ॥ 22॥

एवं(म्) स्फुटं(म्) ब्रह्मविवेकहेतुभिः(फ्),

परापवादेन विशारदेन ।

छित्त्वाऽऽत्मसन्देहमुपारमेत,

स्वानन्दतुष्टोऽखिलकामुकेभ्यः ॥ 23॥

नात्मा वपुः(फ्) पार्थिवमिन्द्रियाणि,

देवा ह्यसुर्वायुर्जलं(म्) हुताशः ।

मनोऽन्नमात्रं(न्) धिषणा च सत्त्व-

महं(ङ्)कृतिः(ख्) खं(ङ्) क्षितिरर्थसाम्यम् ॥ 24॥

समाहितैः(ख्) कः(ख्) करणैर्गुणात्मभिर्-

गुणो भवेन्मत्सुविविक्तधाम्नः ।

विक्षिप्यमाणैरुत किं(न्) नु दूषणं(ङ्),

घनैरुपेतैर्विगतै रवेः(ख्) किम् ॥ 25॥

यथा नभो वाय्वनलाम्बुभूगुणैर्-

गतागतैर्वर्तुगुणैर्न सज्जते ।

तथाक्षरं(म्) सत्त्वरजस्तमोमलै-

रहं(म्)मतेः(स्) सं(म्)सृतिहेतुभिः(फ्) परम् ॥ 26॥

तथापि सं(ङ्)गः(फ्) परिवर्जनीयो,

गुणेषु मायारचितेषु तावत् ।

मद्भक्तियोगेन दृढेन यावद्,

रजो निरस्येत मनः(ख्)कषायः ॥ 27॥

यथाऽऽमयोऽसाधुचिकित्सितो नृणां(म्),
पुनः(फ्) पुनः(स्) सं(न्)तुदति प्ररोहन् ।
एवं(म्) मनोऽपक्वकषायकर्म,
कुयोगिनं(वँ) विध्यति सर्वसं(ङ्)गम् ॥ 28॥

कुयोगिनो ये विहितान्तरायैर्-
मनुष्यभूतैस्त्रिदशोपसृष्टैः।
ते प्राक्तनाभ्यासबलेन भूयो,
युञ्जन्ति योगं(न्) न तु कर्मतन्त्रम् ॥ 29॥

करोति कर्म क्रियते च जन्तुः(ख्),
केनाप्यसौ चोदित आनिपातात् ।
न तत्र विद्वान् प्रकृतौ स्थितोऽपि
निवृत्ततृष्णः(स्) स्वसुखानुभूत्या ॥ 30॥

तिष्ठन्तमासीनमुत व्रजन्तं(म्),
शयानमुक्षन्तमदन्तमन्नम् ।
स्वभावमन्यत् किमपीहमान-
मात्मानमात्मस्थमतिर्न वेद ॥ 31॥

यदि स्म पश्यत्यसदिन्द्रियार्थं(न्),
नानानुमानेन विरुद्धमन्यत् ।
न मन्यते वस्तुतया मनीषी
स्वाप्नं(यँ) यथोत्थाय तिरोदधानम् ॥ 32॥

पूर्वं(ङ्) गृहीतं(ङ्) गुणकर्मचित्र-
मज्ञानमात्मन्यविविक्तमं(ङ्)ग।
निवर्तते तत् पुनरीक्षयैव
न गृह्यते नापि विसृज्य आत्मा ॥ 33॥

यथा हि भानोरुदयो नृचक्षुषां(न्),
तमो निहन्यान्न तु सद् विधत्ते ।
एवं(म्) समीक्षा निपुणा सती मे,
हन्यात्तमिस्रं(म्) पुरुषस्य बुद्धेः ॥ 34॥

एष स्वयं(ञ्)ज्योतिरजोऽप्रमेयो,
महानुभूतिः(स्) सकलानुभूतिः ।
एकोऽद्वितीयो वचसां(वँ) विरामे,
येनेषिता वागसवश्चरन्ति ॥ 35॥

एतावानात्मसम्मोहो, यद् विकल्पस्तु केवले ।
आत्मन्नृते स्वमात्मान- मवलम्बो न यस्य हि ॥ 36॥

यन्नामाकृतिभिर्ग्राह्यं(म्),पं(ञ्)चवर्णमबाधितम्।
व्यर्थेनाप्यर्थवादोऽयं(न्) द्वयं(म्) पण्डितमानिनाम् ॥ 37॥

योगिनोऽपक्वयोगस्य, युं(ञ्)जतः(ख्) काय उत्थितैः ।
उपसर्गैर्विहन्येत, तत्रायं(वँ) विहितो विधिः ॥ 38॥

योगधारणया कां(म्), श्चिदासनैर्धारणान्वितैः।
तपोमन्त्रौषधैः(ख्) कां(म्), श्चिदुपसर्गान् विनिर्दहेत् ॥ 39॥

कां(म्)श्चिन्ममानुध्यानेन, नामसं(ङ्)कीर्तनादिभिः ।
योगेश्वरानुवृत्त्या वा, हन्यादशुभदाञ्छनैः ॥ 40॥

केचिद् देहमिमं(न्) धीराः(स्), सुकल्पं(वँ) वयसि स्थिरम् ।
विधाय विविधोपायै- रथ युं(ञ्)जन्ति सिद्धये ॥ 41॥

न हि तत्कुशलादृत्यं(न्), तदायासो ह्यपार्थकः ।
अन्तवत्त्वाच्छरीरस्य, फलस्येव वनस्पतेः ॥ 42॥

योगं(न्) निषेवतो नित्यं(ङ्), कायश्चेत्कल्पतामियात् ।
तच्छ्रद्दध्यान्न मतिमान्, योगमुत्सृज्य मत्परः ॥ 43॥

योगचर्यामिमां(यँ) योगी, विचरन् मदपाश्रयः ।
नान्तरायैर्विहन्येत, निः(स्)स्पृहः(स्) स्वसुखानुभूः ॥ 44॥

इति श्रीमद्भागवते महापुराणे पारमहं(म्)स्यां(म्)
सं(म्)हितायामेकादशस्कन्धेऽष्टाविं(म्)शोऽध्यायः॥

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्) पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः ॥